# श्रीसोमनाथसंस्कृतयुनिवर्सिटी ,वेरावलम्

## सत्रान्तपरीक्षा – एप्रिल-२०१९

| | | |
|---|---|---|
| कक्षा–आचार्यद्वितीयवर्षम्(SEM- 4) | **प्रश्नपत्रम् – ४** | गुणा: - ७० |
| विषय: - नव्यव्याकरणम् | **कोड – CC 5.4.12** | समय: - ११ त: ०२ |
| दिनाङ्क: - ०२-०४-२०१९ | सन्दर्भग्रन्थ: – वाक्यपदीयम् \| | |

.......................................................................................................................

**प्रथमान्वितिः**

**प्रश्न:-१ निम्नलिखितयोरेकस्या: कारिकाया: व्याख्या कार्या |** **(५)**

(१) शब्दस्योर्ध्वमभिव्यक्तेर्वृत्तिभेदं तु वैकृता: |
ध्वनय: समुपोहन्ते स्फोटात्मा तैर्नभिद्यते ||

(२) यथानुवाक: श्लोको वा सोढत्वमुपगच्छति |
आवृत्या न त स ग्रन्थ: प्रत्यावृत्ति निरूप्यते ||

**प्रश्न:-२ निम्नलिखितेषु कस्यचिदेकस्य व्याख्या कार्या |** **(१०)**

(१) स्फोटज्ञानाय ध्वने: उपयोग: कथं भवति इति यथाग्रन्थं निरूपयत |

(२) अधीतग्रन्थदिशा ध्वनि-स्फोटयो: व्यङ्ग्य-व्यञ्जकभावं समर्थयत |

**द्वितीयान्वितिः**

**प्रश्न:-३ निम्नलिखितयोरेकस्या: कारिकाया: व्याख्या कार्या |** **(५)**

(१) तस्मादभिन्नकालेषु वर्णवाक्यपदादिषु |
वृत्तिकाल: स्वकालश्च नादभेदाद्विभज्यते ||

(२) दूरात्प्रभेव दीपस्य ध्वनिभावं तु लक्ष्यते |
घण्टादीनां च शब्देषु व्यक्तो भेद: स दृश्यते ||

**प्रश्न:-४ निम्नलिखितेषु कस्यचिदेकस्य व्याख्या कार्या |** **(१०)**

(१) वाक्यपदीये उद्धृतानि शब्दानाम् अभव्यक्तिसंबन्धीनि विभिन्नानि मतानि विवेचयत |

(२) 'शब्देष्वेवाश्रिता शक्तिर्विश्वस्यास्य निबन्धी' इति वाक्यपदीयविधानम् उपपादयत |

**तृतीयान्वितिः**

**प्रश्न:-५ निम्नलिखितयोरेकस्या: कारिकाया: व्याख्या कार्या |** **(५)**

(१) अर्थक्रियासु वाक् सर्वान् समीहयति देहिन: |

तदुत्क्रान्तौ विसंज्ञोऽयं दृश्यते काष्ठवुड्यवत् ||

**(२)** प्रविभागे यथा कर्ता तथा कार्ये प्रवर्तते | अविभागे तथा सैव कार्यत्वेनावतिष्ठते ||

**प्रश्नः-६ निम्नलिखितेषु कस्यचिदेकस्य व्याख्या कार्या | (१०)**

(१) वाक्यपदीयदशा स्मृतिमहिमानं वर्णयत |

(२) वाक्यपदीयदृष्ट्या तर्कस्य उपादेयतां मर्यादां च वर्णयत |

**चतुर्थान्वितिः**

**प्रश्नः-७ निम्नलिखितयोरेकस्याः कारिकायाः व्याख्या कार्या | (५)**

(१) सर्वोऽदृष्टफलानर्थां नागमात्प्रतिपद्यते |
विपरीतं च सर्वत्र शक्यते वक्तुमागमे ||

(२) साधुत्वज्ञानविषया सैषा व्याकरणस्मृतिः |
अविच्छेदेन शिष्टानामिदं स्मृतिनिबन्धनम् ||

**प्रश्नः-८ निम्नलिखितासु द्वयोः कारिकयोः व्याख्या कार्या | (१०)**

(१) अविभागाविवृत्तानामभिख्या स्वप्नावच्छ्रुतौ |
भावतत्वं तु विज्ञाय लिङ्गेभ्यो विहिता स्मृतिः ||

(२) न शिष्टैरनुगम्यन्ते पर्याया इव साधवः |
ते यतः स्मृतिशास्त्रेण तस्मात्साक्षादवाचकाः ||

(३) दैवी वाग्व्यतिकीर्णेयमशक्तैरभिधातृभिः |
अनित्यदर्शिनां त्वस्मिन्वादे बुद्धिविपर्ययः ||

**प्रश्नः-९ निम्नलिखितेषु प्रश्नेषु केषाञ्चित् दशप्रश्नानां लघूत्तरं देयम् । (१०)**

(१) ये परम्परातः अपभ्रंशम् एव जानन्ति तेषां कृते साधुशब्दवाचको भवति ?

(२) बालस्य अव्यक्तं भाषणं श्रुत्वा तद्विद् कीदृशं शब्दं निश्चिनोति ?

(३) गौः इति प्रयुयुक्षिते यः संस्कारहीनः शब्दः प्रयुज्यते सः क इति उच्यते ?

(४) साधुत्वज्ञानविषया स्मृतिः का ?

(५) सर्वागमापाये का व्यवस्थिता तिष्ठति ?

(६) सर्वविद्याशिल्पानां कलानां चोपवर्धिनी का ?

(७) लोके सर्वा इतिकर्तव्यता कम् आश्रयते ?

(८) यः संयोगविभागाभ्यां करणैरुपजन्यते सः कः ?

(९) कीदृशो वायुः शब्दत्वं प्रतिपद्यते ?

(१०) ज्वाला ज्वालान्तरादिव स्फोटात् के उपजायन्ते ?

(११) दीर्घादिभेदा: स्फोटस्य भेदा: वर्तन्ते न वा ?

(१२) अल्पे महति वा शब्दे को न भिद्यते ?

(१३) स्फोटनादयोर्मध्ये को व्यङ्ग्य: ?

(१४) स्फोटस्य व्यञ्जक: क: ?

(१५) दैवीवाक् कै: व्यवकीर्णा